सत्यं शिवमसुन्दरम्

WEST BENGAL STATE UNIVERSITY

B.A. Major 2nd Semester Examination, 2026

SANDSC202T/SANDSCN202T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

UNIT-I

[F.M. - 25]

1. अधोलिखितेषु प्रश्नेषु ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम् — $10\times1 = 10$

(क) रामायणस्य रचनाकालं आलोच्यताम्।

(ख) ऋग्वेदस्य संवादसूक्तानाम् आलोचना क्रियताम्।

(ग) पुराणलक्षणं किम् ? व्याख्यायताम्।

2. अधोलिखितेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। तेषु ***एकस्य*** प्रश्नस्य उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च देयम्। $2\times5 = 10$

(क) वेदशब्दस्य अर्थः व्युत्पत्तिपर्यालोचनपूर्वकं लेख्यः।

(ख) विनियोगः कः भवति ? कतिविधः भवति ?

(ग) वेदस्य ऋषिकाः काः सन्ति ?

(घ) 'कस्मै देवाय हविषा विधेम' — 'कः' शब्देन कः वोध्यः ?

(ङ) यजुर्वेदस्य ऋत्विक् कः भवति ?

(च) कल्पसूत्रस्य कति विभागाः सन्ति ?

(छ) सूर्यवंशस्य प्रथमः नृपतिः कः आसीत् ?

(ज) महाभारतस्य परिशिष्टाः अंशः कोऽस्ति ?

(झ) कति महापुराणानि सन्ति ?

3. अधोलिखितानां ***विषयमेकमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — $5\times1 = 5$

(क) शौनकः

(ख) निरुक्तम्

(ग) हरिवंशम्

(घ) त्रयी

UNIT-II

[F.M. - 15]

4. अधोलिखितेषु विषयेषु यथाभिमतं ***त्रयमाश्रित्य*** संस्कृतभाषायां देवनागरीलिप्या च टीकां लिखत — 5×3 = 15

(क) भर्तृहरिः

(ख) अश्वघोषः

(ग) रघुवंशम्

(घ) किरातार्ज्जुनीयम्

(ङ) नैषधचरितम्

(च) पञ्चतन्त्रम्

UNIT-III

[F.M. - 10]

5. अधोलिखितेषु विषयेषु यथाभिमतं ***द्वयमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — 5×2 = 10

(क) महाभाष्यम्

(ख) सांख्यदर्शनम्

(ग) अष्टाङ्गिकमार्गः

(घ) सुश्रुतसंहिता

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2026

SANDSC404T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours

Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

UNIT-I

1. 'स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः' — इत्युक्तेः यथार्थता स्वप्ननाटकानुसार प्रतिपाद्या। 10

अथवा

'स्वप्नवासवदत्तम्' इति नाटके वासवदत्ता-पद्मावत्योः चरितयोः तुलनात्मको विमर्शः विधेयः।

2. अधोलिखितेभ्यो यथेच्छ **पञ्च** प्रश्नाः देवनागरीलिप्या संस्कृतभाषया च समाधेयाः। 2×5 = 10

(क) 'स्वप्नवासवदत्तम्' इति पदे कथ नपुसकत्वम् ?

(ख) क आसीद् रुमण्वान् ?

(ग) 'धन्या सा स्त्री या तथा वेत्ति भर्त्ता' — इत्यत्र सा का ? सा कथ धन्या ?

(घ) 'तस्मिन् सर्वमधीन हि यत्राधीनो नराधिपः' — इति नाटकस्य कस्मिन् अङ्के कैन उक्तम् ?

(ङ) 'स्वप्नवासवदत्तमि'ति नाटकस्य उत्सः कः ?

(च) राजा उदयनः कथ लावाणकग्रामे न्यवसत् ?

(छ) उदयनस्य महिषीद्वयस्य नाम लेख्यम्।

(ज) स्वप्नवासवदत्तमिति नाटके स्वप्नदृश्यं कस्मिन् अङ्के लभ्यते ?

3. सस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्य*** श्लोकस्य व्याख्या कार्या — 5

(क) सुखमर्थो भवेद् दातु सुख प्राणाः सुख तपः।
सुखमन्यद् भवेत् सर्वं दुःख न्यासस्य रक्षणम्॥

(ख) गुणानां वा विशालाना सत्काराणाञ्च नित्यशः।
कर्त्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥

4. अधोलिखितानां प्रश्नानामुत्तर सस्कृतभाषया देवनागरीलिप्या च लेख्यम्।

(क) प्रकृतिप्रत्ययौ निरूपणीयौ — रक्षणम् (3 क), अथवा नित्यशः (3 ख)। 1

(ख) रेखाङ्किपदे सकारणकारकविभक्तिः निर्णेया — न्यासस्य (3 क), अथवा लोके (3 ख)। 2

(ग) व्यासवाक्यौल्लेखपुरःसर समासो लेख्यः — स्वप्नवासवदत्तम् अथवा सत्काराणाम् (3 ख)। 2

UNIT-II

5. रघुवंशमहाकाव्यस्य प्रथमसर्गानुसार राज्ञो दिलीपस्य चरित्र सुरगिरा देवनागरीलिप्या च लेख्यम्। 10

अथवा

रघुवंशमहाकाव्यस्य मङ्गलाचरणश्लोके प्रतिभात शब्दार्थतत्त्वं देवभाषया देवनागरीलिप्या च व्याख्येयम्। 10

6. संस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्य*** श्लोकस्य व्याख्या कार्या — 5

(क) त सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः सलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(ख) प्रजाना विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासा केवल जन्महेतवः॥

7. अधोलिखिताना प्रश्नानामुत्तर सुरगिरा देवनागरीलिप्या च लेखनीयम्।

(क) प्रकृतिप्रत्ययौ निरूपणीयौ — विशुद्धिः (6 क), अथवा रक्षणाद् (6 ख)। 1

(ख) रेखाङ्कितपदस्य सकारणकारकविभक्तिः निर्णेया — सदसद्व्यक्तिहेतवः (6 क) अथवा जन्महेतवः (6 ख)। 2

(ग) सविग्रहः समासो निर्णेयः — सदसद्व्यक्तिहेतवः (6 क), अथवा विनयाधानाद् (6 ख)। 2

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2026

SANDSC405T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

UNIT-I

1. ***यथाभिमतमेकस्य*** प्रश्नस्य उत्तरं लेखनीयम्। $10\times1=10$

(क) हंसपदिका का ? तस्याः गीतिः "अभिज्ञानशकुन्तल" — नाटकस्य कस्मिन् अङ्के दृश्यते ? नाटकस्यास्य क्रमविकाशे अस्या गीतेः तात्पर्यं पर्यालोच्यताम्। 1+1+8

(ख) अभिज्ञानशकुन्तल-नाटकस्य नामकरणस्य तात्पर्यं विचारयत। 10

2. ***कस्यचिदेकस्य*** श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत — $5\times1=5$

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ख) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥

3. अधोलिखितेषु ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः — $2\times5=10$

(क) "परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे" — अत्र द्वे — इति पदेन के सूच्येते ?

(ख) "..... येन त्वया दर्शनीयं न दृष्टम्" — अत्र किम् तावद् दर्शनीयम् आसीत् ? केन च तत् न दृष्टम् ?

(ग) कण्वाश्रमात् पतिगृहयात्राकाले शकुन्तलया सह अपरे के गताः ?

(घ) दुष्यन्तेन तपोवनप्रवेशकाले महर्षिः कण्वः कुत्र किमर्थमगच्छत् ?

(ङ) "आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" — कस्येयमुक्तिः ? कम् उद्दिश्य च प्रयुक्ता ?

(च) तपोधना राज्ञे कीदृशं करं दत्तवन्तः ?

(छ) "रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी" — का अत्र प्रियसखी ? किमर्थं सा रक्षितव्या ?

4. (क) संस्कृतभाषया देवनागरीलिप्या च सविग्रहः समासः करणीयः। 2

सरसिजम् in (2 क) अथवा प्रत्यर्पितन्यासः in (2 ख)

(ख) अधोलिखितेषु ***शब्दत्रयस्य*** संस्कृतभाषया देवनागरीलिप्या च प्रकृतिप्रत्ययनिर्णयः करणीयः।
संप्रेष्य (2 ख), अनुविद्धम् (2 क) जातः (2 ख), तनोति (2 क), परिग्रहीतुः (2 ख)।

UNIT-II

5. अधःप्रदत्तयोः ***कस्यचिदेकस्य*** प्रश्नस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। $10\times1=$

(क) बाणभट्टस्य काव्यप्रतिभां रचनाशैलीं चावलम्ब्य संक्षेपेण आलोच्यताम्।

(ख) राजकुमारं चन्द्रापीडं प्रति मन्त्रिणः शुकनासस्योपदेशः संक्षेपेण उपवर्ण्यताम्।

6. अधःप्रदत्तं पाद्यांशं पठित्वा तत्रतः प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतभाषया देवनागरीलिप्या च लेखनीयानि।

लक्ष्मीः ..... उच्चैः श्रवसश्चञ्चलताम् कालकूटान्मोहन-शक्तिं मदिरायाः मदं कौस्तुभमणेरतिनिष्ठुर्यम् इत्येतानि सहवासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेवोद्गता।

(क) "मदिरायाः" — इत्यत्र ससूत्रं सकारणविभक्तिः निर्णेया।

(ख) "विरहविनोदचिह्नानि" — इत्यस्य सविग्रहः समासः करणीयः।

(ग) "उद्गता" — इत्यस्य प्रकृतिप्रत्ययौ निर्णेयौ।

7. अधोलिखितेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीका लेखनीया —

(क) मृगतृष्णिका।

(ख) कौस्तुभमणिः।

(ग) नारायणमूर्तिः।

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2026

SANDSC406T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

UNIT-I
Marks-20

1. अधोलिखितयोः प्रश्नयोः संस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्योत्तरं*** प्रदेयम्। $10\times1=10$

(क) दशकुमारचरितम् कीदृशं गद्यकाव्यमिति सयुक्ति प्रतिपाद्यताम्।

(ख) 'राजवाहनचरितम्' इति आख्यानभागे वर्णितः चण्डवर्मणः चरित्रविषयः वर्णनीयः।

2. ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या लिखतु। $5\times1=5$

(क) "सुप्तयोस्तु तयोः स्वप्ने विसगुणनिगडितपादो जरठः कश्चिज्जालपादोऽदृश्यत"।

(ख) अयि मूढ। किमस्ति कन्यान्तःपुरदूषकेऽपि कश्चित् कृपावसरः ?

3. (क) ***यथेच्छमेकपदस्य*** सन्धिविच्छेदः समाधेयः। $1\times1=1$

कश्चित् (2 क); कृपावसरः (2 ख)

(ख) ***यथेच्छमेकस्य*** सविग्रहः समासः निर्णेयः। $2\times1=2$

विसगुणनिगडितपादः (2 क) कन्यान्तः पुरदूषके (2 ख)

(ग) यथेच्छ ***पददवयस्य*** प्रकृतिप्रत्ययौ निर्णेयौ। $1\times2=2$

अदृश्यत (2 क); मूढ (2 ख); 'सुप्तयोः' (2 क)

UNIT-II
Marks-30

4. यथाभिमतं प्रश्नस्य ***एकस्योत्तरं*** संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। $10\times1=10$

(क) "नारिकेलफलसम्मित वचो भारवेः" — सोदाहरण विचारयतु।

(ख) किरातार्जुनीयस्य प्रथमसर्गे द्रौपदीप्रदत्तभाषणस्य सारः समुल्लिख्यताम्।

5. ***यथेच्छमेकस्य*** श्लोकस्य संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या। $5\times1=5$

(क) कृतप्रणामस्य मही महीभुजे जिता सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रिय प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(ख) वनान्तशय्याकठिनोकृताकृती क्वचाचितौ विष्वगिवागजौ गजौ।

कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न वाधितुम् ॥

$2 \times 5 = 10$

6. अधोलिखितेषु **पञ्च** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः ।

(क) किरातार्जुनीयम् इति महाकाव्ये कति सर्गाः सन्ति ? अस्य महाकाव्यस्य प्रधानः रसः कः ?

(ख) स वर्णिलिङ्गी विदितः समाययौ — वर्णिलिङ्गी कः ? सः कुत्र उपस्थितः ?

(ग) उपायचतुष्टयस्य नाम किम् ?

(घ) 'तथापि जिहम सः भवज्जिगीषया' — अत्र 'जिहमः' इति पदस्य कोऽर्थः ? कश्च जिहमः ?

(ङ) 'किरातार्जुनीयम्' इति महाकाव्यस्य नायकः कः ? किम् नायिकायाः नाम ?

(च) कः सुयोधनः ? 'सुयोधनः' इति पदस्य कोऽर्थः ?

(छ) चारचक्षुषः के किमर्थमुच्यन्ते ?

$1 \times 1 = 1$

7. (क) ***यथेच्छमेकपदस्य*** सन्धिविच्छेदः समाधेयः ।

प्रवक्तुमिच्छन्ति (5 क); त्वमेतौ (5 ख)

$2 \times 1 = 2$

(ख) ***यथेच्छमेकपदस्य*** सविग्रहः समासः निर्णेयः ।

महीभुजे (5 क); कचाचितौ (5 ख)

$1 \times 2 = 2$

(ग) यथेच्छ ***पदद्वयस्य*** प्रकृतिप्रत्ययौ निर्णेयौ ।

निवेदयिष्यतः (5 क); विव्यथे (5 क); विलोकयन् (5 ख); वाधितुम् (5 ख) ।

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2026

SANDSC407T-SANSKRIT (MAJOR)

DHARMA-SHASTRA

Time Allotted: 2 Hours

Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

UNIT-I
Marks-20

1. ***यथेच्छमेकः*** प्रश्नः समाधेयः। $10\times1 = 10$

(क) "स राजा पुरुषो दण्डः स नेता शासिता च सः" — मनुसहितामाधारीकृत्य वाक्यस्यास्य तात्पर्य्यं वैशद्येन लिखत।

(ख) मनुसंहितायां दुर्गाणां वैशिष्ट्यानि यथा प्रतिपादितानि तथा वैशद्येन विवृणुत।

2. ***यथेच्छमेकः*** श्लोकः संस्कृतभाषया देवनागरीलिप्या च व्याख्येयः। $5\times1 = 5$

(क) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(ख) बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥

3. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। $5\times1 = 5$

(क) उपायचतुष्टयम्।

(ख) व्यसनम्।

(ग) अमात्यः।

UNIT-II
Marks-15

4. यथेच्छं ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। $2\times5 = 10$

(क) नृपः कैः सह कथं व्यवहारान् पश्येत्?

(ख) याज्ञवल्क्यनये दुष्टलक्षणं किम्?

(ग) याज्ञवल्क्यनये अर्थशास्त्रधर्मशास्त्रयोर्विरोधे किं बलवद्भवति? तत्र किं कारणम्?

(घ) प्रमाणं कतिविधम्? दिव्य प्रमाणं कदा आश्रीयते?

(ङ) को नाम पूगः?

(च) ऋणादानं कतिविधम् ? तेषां नामानि लिखत।

(छ) याज्ञवल्क्यसंहितानुसारम् अदेयम् ऋणं किं किं भवति ?

5. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) व्यवहारः।

(ख) मिताक्षरा।

(ग) प्रतिभूः।

UNIT-III
Marks-15

6. यथेच्छं ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) मानवमते कति विद्याः ? तासां नामानि लिखत।

(ख) कौटिल्यमते कति वेदाङ्गानि ? तेषां नामानि लिखत।

(ग) कौटिल्यनये क्षत्रियस्य स्वधर्मः कः ?

(घ) अर्थशास्त्रनये स्वधर्मः कथं न त्याज्यः ?

(ङ) को नाम इन्द्रियजयः ? स च कथं कार्यः ?

(च) विशालाक्षमते सहाध्यायिनोऽमात्यरूपेण नियोगः कथं न कर्तव्यः ?

(छ) "अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः" — कौटिल्यमते वाक्यस्यास्य किं तात्पर्यम् ?

7. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) मात्स्यन्यायः।

(ख) वार्ता।

(ग) वृद्धसंयोगः।

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 6th Semester Examination, 2026

SANDSC612T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

सर्वेषां प्रश्नानामुत्तरं सुरगिरा देवनागरीलिप्या च लेख्यम्

UNIT-I

1. ***यथेच्छमेकस्योत्तरं*** प्रदेयम् — $10\times 1=10$

(क) 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रस्याशयः सविशदं स्पष्टीक्रियताम्। 10

(ख) अपादानकारके का विभक्तिः भवति ? 'ध्रुवमपायेऽपादानमि'ति सूत्रं दीक्षितमतानुसारं व्याख्येयम्। 1+9

2. निम्नलिखितप्रश्नेषु यथेच्छं **पञ्च** प्रश्नाः समाधेयाः। $2\times 5=10$

(क) कर्मसंज्ञाविधायकानि पाणिनेः सूत्राणि कानि ?

(ख) 'अधि-शीङ्-स्थासां कर्म' — इति सूत्रस्य व्याख्यायां दीक्षितेन किमुक्तम् ?

(ग) करणसंज्ञाविधायकं पाणिनेः सूत्रं किम् ? केन सूत्रेण करणे तृतीया विभक्तिः भवति ?

(घ) 'कर्मणा यमथिप्रैति स सम्प्रदानम्' — इत्यस्य वृत्तौ दीक्षिताचार्येण किमुक्तम् ?

(ङ) 'नमस्' – शब्दयोगे का विभक्तिः विधेया ? उदाहरणमेकं दीयताम्।

(च) अपवर्गे का विभक्तिः स्यात् ? उदाहरणं दीयताम्।

(छ) 'षष्ठी शेषे' — इति सूत्रस्य वृत्तौ दीक्षिताचार्येण किमुक्तम् ?

(ज) 'उपाध्यायादधीते' — रेखाङ्कितपदस्य कारकमुल्लिख्य सूत्रं दर्श्यताम्।

3. अधस्तनेषु ***यथेच्छमेकस्य*** सूत्रस्य व्याख्या कार्या — $5\times 1=5$

(क) अकथितञ्च

(ख) येनाङ्गविकारः

(ग) आधारोऽधिकरणम्

UNIT-II

4. अधोदत्तयोः प्रश्नयोः यथामति ***एकस्योत्तरं*** करणीयम्। $10\times 1=10$

(क) 'समर्थः पदविधिः' — सूत्रस्यास्य तात्पर्यं व्याख्येयम्।

(ख) बहुव्रीहिसमासस्य लक्षणं भेदाश्च ससूत्रं सोदाहरणञ्च व्याख्यायन्ताम्।

Turn Over

5. अधोदत्तेषु **द्वयोः** समाससूत्रोल्लेखपूर्वक साधनं व्याख्येयम् — 5×2 = 10

(क) प्रत्यक्षम्

(ख) केशाकेशि

(ग) राजपथः

(घ) कुम्भकारः

(ङ) हरिहरौ

6. अधोलिखितेषु **यथेच्छमेकस्य** सूत्रस्य व्याख्या कार्या — 5×1 = 5

(क) संख्या वंश्येन

(ख) विशेषणं विशेष्येण बहुलम्

(ग) चार्थे द्वन्द्वः

——×——

WEST BENGAL STATE UNIVERSITY

B.A. Major 6th Semester Examination, 2026

SANDSC613T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्

UNIT-I

1. निम्नलिखितानां यथेच्छं ***विषयत्रयमवलम्ब्य*** टीका विरचनीया। 5×3 = 15

(क) यास्काचार्यः

(ख) निघण्टुः

(ग) उपसर्गाः

(घ) भावविकाराः

(ङ) आचार्यः

अथवा

अधोलिखितानां वाक्यानां यथेच्छं ***त्रयं*** व्याख्येयम् 5×3 = 15

(क) समाम्नायः समाम्नातः।

(ख) सत्त्वप्रधानानि नामानि।

(ग) उच्चावचेष्वर्थेषु निपतन्ति।

(घ) इन्द्रियनित्यं वचनमौदुम्बरायणः।

(ङ) अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते।

UNIT-II

2. अधोलिखितानां ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) जीवात्मनः उत्क्रमणं बृहदारण्यकोपनिषदः चतुर्थब्राह्मनुसृत्य सविशदं लिख्यताम्।

(ख) बृहदारण्यकोपनिषदः याज्ञवल्क्यमैत्रेयीसंवादानुसारम् आत्मतत्त्वं वैशद्येन विव्रियताम्।

3. अधोलिखितानां यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं देयम् — 2×5 = 10

(क) 'उपनिषद्' इति शब्दस्य क आशयः ?

(ख) 'बृहदारण्यकम्' इति पदस्य व्युत्पत्तिः कार्या।

(ग) बृहदारण्यकोपनिषदि कति काण्डानि ? कानि च तानि ?

(घ) तृणजलायुका कथं तृणान्तरमाप्नोति ?

Turn Over

(ङ) विद्या का ? का नाम अविद्या ?

(च) याज्ञवल्क्यस्य कति भार्याः ? काश्च ताः ?

(छ) 'सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः' — केन उक्तम् ? कमुद्दिश्य उक्तमिदम् ?

4. अधोलिखितमुपनिषद्वचनं पठित्वा **सर्वेषां** प्रश्नानामुत्तरं विधीयताम्। 5

'तद् यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविदां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति'।

(क) सविग्रहः समासः निर्णेयः — 2

तृणजलायुका ***अथवा*** अविद्या

(ख) प्रकृति-प्रत्ययौ निरूप्येताम् 2

उपसंहरति ***अथवा*** निहत्य

(ग) सन्धिविच्छेदः क्रियताम् 1

गत्वान्यम् ***अथवा*** आत्मेदम्

UNIT-III

5. अधोलिखितानां मन्त्राणां यथेच्छं ***मन्त्रद्वयस्य*** व्याख्या कार्या। 5×2 = 10

(क) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्तिन कर्म लिप्यते नरे॥

(ख) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥

(ग) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

(घ) असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

——×——

WEST BENGAL STATE UNIVERSITY
B.A. Major 6th Semester Examination, 2026

SANDSC614T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours

Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

सर्वेषां प्रश्नानां संस्कृतेन देवनागर्या च समाधानं विधेयम्

UNIT-I

1. अधोलिखितेषु **एकः** प्रश्नः समाधेयः। 10×1 = 10

(क) को नाम अभावः ? तर्कसंग्रहग्रन्थमनुसृत्य अभावस्य भेदाः सोदाहरणं लेख्याः। 2+8

(ख) किं नाम प्रत्यक्षम् ? अन्नंभट्टमतानुसारेण प्रत्यक्षस्य स्वरूपं संक्षेपेण प्रतिपाद्यताम्। 2+8

(ग) का नाम व्याप्तिः ? इति तस्याः लक्षणं सोदाहरणं प्रतिपाद्यम्।

2. अधोलिखितेषु ***विषयद्वयमाश्रित्य*** टीका लेख्या। 5×2 = 10

(क) सामान्यम्।

(ख) सन्निकर्षः।

(ग) आत्मा।

(घ) उपमानम्।

3. अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः — 2×5 = 10

(क) तर्कसंग्रहस्य मङ्गलश्लोकः लेख्यः।

(ख) तर्कसंग्रहमते कति पदार्थाः सन्ति ? के च ते ?

(ग) कति द्रव्याणि तर्कसंग्रहकारेण स्वीकृतानि ? कानि च तानि ?

(घ) कति कर्माणि ? कानि च तानि ?

(ङ) मनसः लक्षणं लेख्यम्।

(च) तर्कसंग्रहमते परार्थानुमानस्य कति अवयवाः सन्ति ? के च ते ?

(छ) कति हेत्वाभासाः तर्कसंग्रहे स्वीकृताः ? के च ते ?

UNIT-II

4. अधोलिखितेषु ***विषयद्वयमाश्रित्य*** टीका लेख्या। 5×2 = 10

(क) अज्ञानम्।

(ख) अध्यारोपः।

(ग) प्राज्ञः ।

(घ) पञ्चीकरणम् ।

5. अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः । 2×5 = 10

(क) को नाम वेदान्तः ?

(ख) किं तावत् अनुबन्धचतुष्टयम् ?

(ग) नित्यकर्मणः लक्षणं किम् ?

(घ) किं नाम मुमुक्षुत्वम् ?

(ङ) कः अपवादः ?

(च) को नाम नित्यानित्यवस्तुविवेकः ?

(छ) कस्तावत् दमः ?

——×——

सत्यं शिवम्सुन्दरम्

WEST BENGAL STATE UNIVERSITY

B.A. Major 6th Semester Examination, 2026

SANDSC615T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

The figures in the margin indicate full marks.
Candidates should answer in their own words and adhere to the word limit as practicable.

सर्व्वेषां प्रश्नानामुत्तराणि संस्कृतभाषया देवनागरीलिप्या च लेखनीयानि

UNIT-I

1. ***यथाभिमतमेकस्य*** प्रश्नस्य उत्तरं लेखनीयम् — $10\times1 = 10$

   (क) मम्मटोक्तं काव्यलक्षणं प्रतिपदव्यावृत्तिपूर्वकं सविस्तरं प्रतिपादयत। 10

   (ख) मम्मटोक्तदिशा काव्यस्य प्रयोजनं सविशदम् आलोच्यताम्। 10

2. अधःप्रदत्तेषु विषयेषु यथामति ***द्वयोः*** टीका विरचनीया। $5\times2 = 10$

   (क) उत्तमकाव्यम्।

   (ख) काव्यकारणम्।

   (ग) तात्पर्यार्थः।

   (घ) अभिधा।

   (ङ) नवरसरुचिरा।

3. अधःप्रदत्तेषु प्रश्नेषु यथामति ***पञ्च***-प्रश्नानां उत्तराणि संक्षेपेण प्रदेयानि — $2\times5 = 10$

   (क) काव्यप्रकाशस्य एकस्याः टीकायाः तथा तस्याः टीकायाः रचयितुश्च नामनि लिखतु।

   (ख) काव्यप्रकाशस्य मङ्गलश्लोके का देवता स्तूयते ? तत्र ह्लादैकमयीम् इति पदस्य कोऽर्थः ?

   (ग) स्फोट इति किमुच्यते मम्मटमतेन लेख्यम्।

   (घ) मम्मटाचार्यमतेन शब्दः कतिविधः ?

   (ङ) का नाम शक्तिः ?

   (च) सङ्केतितार्थः कतिविधः ?

   (छ) का नाम व्यञ्जना ?

   (ज) आकाङ्क्षा का ? योग्यता इत्यस्य कोऽर्थः ?

UNIT-II

4. अधःप्रदत्तेषु यथामति ***पञ्चप्रश्नानामुत्तराणि*** प्रदेयानि। $2\times5 = 10$

   (क) दशरूपकस्य मङ्गलश्लोके के देवाः स्तूयन्ते ?

Turn Over

(ख) किं नाम नाट्यम् ? तस्य नामान्तरं च किम् ?

(ग) दशरूपककारस्य मतेन केषां कस्मिन् विषये मतिविभ्रमः जायते ?

(घ) दशरूपकस्य एकस्याः टीकायाः तट्टीकाकारस्य च नामद्वयं लिखतु।

(ङ) धनञ्जयोक्तदिशा बीजस्य लक्षणं लिखतु।

(च) किं नाम अर्थोपक्षेपकम् ?

(छ) प्रयत्नस्य कुत्र अन्तर्भावः ? तस्य लक्षणं किम् ?

(ज) नृत्य-नृत्तयोः को भेदः ?

5. अधःप्रदत्तेषु विषयेषु यथामति **द्वयोः** टीका विरचनीया — $5 \times 2 = 10$

(क) प्रासङ्गिकं वृत्तम्।

(ख) पताकास्थानकम्।

(ग) मुखसन्धिः।

(घ) प्रवेशकः।

——×——